SAMVARDHINI
PEER REVIEWED MULTILINGUAL E-RESEARCH JOURNAL
(ISSN ONLINE: - 2583-7176)
https://samvardhini.in
https://www.samskritpromotion.in

# तैत्तिरीयोपनिषदि शिष्यशिक्षायामाचार्यस्यावदानम् - तदानीमिदानीं च

**Dr. Rajesh Pramanik**

SAMVARDHINI :- 01/12/2025
Volume - 7
Issue - 2
(ISSN ONLINE :- 2583-7176)
https://samvardhini.in

**Dr. Rajesh Pramanik**
Guest faculty
Department of Sanskrit Studies The School of Humanities University of Hyderabad Hyderabad, Telangana - 500046
Email - pramanikr071@gmail.com

**शोधसार:**

कृष्णयजुर्वेदीयस्य तैत्तिरीयारण्यकस्य सप्तमाष्टमनवमानां प्रपाठकानां नाम तैत्तिरीयोपनिषदिति कथ्यते। तत्र च सप्तमः प्रपाठकः शिक्षावल्ली, अष्टमः प्रपाठकः ब्रह्मानन्दवल्ली नवमश्च प्रपाठको भृगुवल्लीत्यस्माभिर्ज्ञायत एव। अस्याञ्चोपनिषदि नृयोनिगतसाधनब्रह्मजिज्ञासासज्ज्ञाननैतिकतागुरुशिष्यसम्बन्धादिविषयविवेचनं सोज्ज्वलं प्रकाशितम्। विशेषेण शीक्षावल्ल्यां शिष्यशिक्षायामाचार्यस्यावदानमनवद्यरूपेण प्रकाशितम्। वर्तन्ते निर्मलब्रह्मविद्यानिरूपणचित्तैकाग्रतागुर्वनुग्रहादयः शिष्याय अत्यन्तमावश्यकाः। शीक्षावल्ल्यां विविधोपासनाः शिष्याचार्यसम्बन्धिशिष्टाचाराः निरूपिताः सन्ति। विषयप्राङ्गणेऽस्मिन् ब्रह्मविद्यालाभेऽभूत्तत्परो भृगुः, व्रह्मविद्याप्त्यर्थमाजगाम च वरुणशरणम्। स च आचार्यो वरुणो ब्रह्मप्राप्तिहेतुभूतोपासनामुपदिदेश भृगवे। भृगुश्चाचार्योपदेशादेशानुसारेण यद्यदाचचार तदेव गुरुशिष्यपरम्परायाः परमदृष्टान्तमस्त्यस्मिन्संसारे। शिक्षावल्लीनामानुसारेण आचार्यसकाशाच्छिष्यस्य यादृशं शिक्षाग्रहणं तद्वास्तविकतयैवानवद्यमसाधारणमपूर्वञ्च। भृगुं प्रत्यत्राचार्यप्रदत्तशिक्षा न केवलाक्षरपरिमितापि त्वाध्यात्मिकस्वरूपा। शिक्षायाः मूलोपादानानि चैवंक्रमेणोक्तानि – अक्षरः, स्वरः, मात्रा(उच्चारणकालः), प्रयत्नः, समोच्चरणम्, क्रमिकतेति।[1] एभिरेव षड्भिर्मूलोपादानैः शास्त्राध्ययने श्रवणे मनने सद्व्यवहारिके उन्नतचारित्रगुणे च समग्ररूपेणोन्नयति शिक्षकः शिक्षार्थिनम्। पुनश्च महासंहितोक्तानां गूढार्थानां विविधलोकदीप्तमानाग्निविद्यासन्तानात्मादीनां विषये विशेषज्ञानप्रदानेन शिष्यस्योपयोगितां वर्धयत्युभयतोर्बाह्याध्यात्मिकस्तरयोः। तैत्तिरीयोपनिषदोच्यत आचार्यस्य प्रधानकर्तव्यमिदमस्ति यत्स्वशिष्यान् आध्यात्मिकमार्गे प्रेरणम्। आचार्यवरूणात् प्राप्तेनोपदेशेनोपलब्धिरियमजायत

1. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 2/1

भृगोः – अन्नं ब्रह्म, ततः प्राणः, ततस्ततः मनः विज्ञानम् इति।[2] क्रमेणान्त आनन्दमेव ब्रह्मेति विजज्ञे। इत्थञ्च तेनात्मबोधपरब्रह्मबोधयोः पूर्णज्ञानमवेदि। पुरूषस्यान्नमेव पुष्टिसाधकं पुरुषार्थसाधनसहायकमित्यत एव कदापि नान्नं तुच्छीकरणयोग्यम्। जलान्नासनादिनाभ्यर्थनायां सत्यामतिथेस्तदगृहकर्तुमानं समृद्धिश्च वृद्धिं प्राप्नोति। आनन्दादेव सृजनलयपालनरूपं कार्यं विघटत इति हेतोरेवानन्द एव ब्रह्मस्वरूपम्। अस्याञ्चोपनिषद्यन्नादारभ्यानन्दमयकोशपर्यन्तं ब्रह्मप्राप्तिविषयिकी व्याख्या दृग्गोचरीभूता भवति। यच्च जीवनस्य क्षणिकतां संस्मार्य परमसत्यस्वरूपे आत्मबोधस्वरूपे च मार्गे प्रेरयति मनुष्यान्। आध्यात्मिकशिक्षा न केवलं जागतिकसाफल्येषु सीमितापि तु तदतिक्रम्य मानवं प्रेरयति मोक्षमार्गं प्रति। यद्यपीदानीन्तने समये दर्शनचर्चायाः मार्गः रुद्धप्रायस्तथाप्यास्याः लब्धशिक्षा-समूहः जनमानसे निखिलसमाजे च चिन्तनशीलतायाः वर्धने शान्तिस्थापने आध्यात्मिकोत्कर्षे च गुरुत्वपूर्णं भारमुद्वहति।

**कुटशब्दाः**

आचार्यः, शिष्यः, महासंहिता, उपदेशः, आदेशः, अनुशासनम्, नैतिकता, ब्रह्मज्ञानम्, पञ्चकोशः।

2. तैत्तिरीयोपनिषद्, ब्रह्मानन्दवल्ली- 2/1

## आचार्यस्य द्वैतभूमिका

त्रयोऽर्थाः सन्त्याचार्यशब्दस्य। तद्यथादावेव- यः शास्त्रं शुद्धरूपेण पठितुमवगन्तुं च समर्थः सः। द्वितीयार्थस्तु, धर्मशास्त्रवेदशास्त्राचारशास्त्रप्रभृत्युक्तशिक्षानुसारेण लोकान् पालयितुं प्रवृत्तो भवति स आचार्यः। अर्थात्, मनुष्यान् शास्त्रानुसारेणाचारयति, जीवनं यापयति, नियमानुसारेण प्रावर्तयति। तृतीयोऽर्थोऽयमस्ति यत्, अन्यमनसि शास्त्रज्ञानं प्राविश्य तदनुसारेण मानयितुं ग्राहयितुमुद्बुद्धो भवति यः सः। अस्यार्थस्य तात्पर्यमिदमस्ति- स्वकीयानुष्ठानेन परप्रेरणमपि यस्य धर्मः स आचार्यः। स्वयं नाचरति परे तूपदिशति सः न आचार्यः। नैव वाचिकत्वभिन्नमन्यत्किमपि यः केवलमुपदेशमात्रं करोति। न च तज्ज्ञानम्। शास्त्रेणोच्यते, दशाध्यापकेभ्योऽधिक एक एवाचार्यः। आचार्यशतकाच्चाधिकोऽस्त्येकः पिता श्रेष्ठः। पुनश्च पितृसहस्राच्छ्रेष्ठैका माता। किमर्थमयमेव क्रम इति चेन्माताचरतीत्यत एवेत्युत्तरम्। अत्रानुष्ठानेन मातृशक्तेरनन्तरूपः पुत्रस्नेहो गृह्यते। सन्तानश्च तं मातृस्नेहमनुभवति। यत्र नास्ति कापि स्वार्थकातरता। वस्तुतस्तु शिक्षाङ्गणे एकः एतादृशः कश्चनाचार्य आवश्यको यः साक्षाच्छिक्षामूर्तिस्वरूपः। यः स्वजीवनेऽन्वभूच्छिक्षाम्। यस्य च जीवनं तच्छिष्यसमीपे साक्षात् तिष्ठति चेदेवाचार्यः सः। स एव शिष्यं स्प्रष्टुं समर्थः। स एवानुशासने सक्षमो योग्यश्च। अन्ये चापरेऽक्षमा उपदेशदाने। एतस्मादेव

श्रुत्युक्ताचारवर्जिताचार्येणास्माकं जीवनेऽप्यनुष्ठानं नैव भवति। तदेवोच्यते- **'वेदम् अनुच्च आचार्य अन्तेवासिनम् अनुशस्ति। मातरः सहस्रेभ्यः वत्सलतरा श्रुतिः।'**[3]

## महासंहितायाः ज्ञानम्

वयमिहलोके एकत्र महिम्न्येकत्र च पवित्रज्योतिष्युपनीताः सन्तः ज्ञानं लप्सीमहि। अथातः महासंहिताया उपनिषदं व्याख्यास्यामः – पञ्चस्वदिकरणेषु[4]। अत्र लोको नाम विश्वजगद्रूपेण परिव्याप्तः पृथिव्यादिः। यत्र पृथिवी प्रथमरूपा, द्यौर्द्वितीयरूप आकाश्चसन्धिरनयोर्वायुश्च सन्धिग्रन्थिः।[5] द्वितीये च दीप्तमानाग्निः प्रथमरूप आदित्योऽपररूपो जलधारा च सन्धिर्विद्युच्च तत्सन्धिग्रन्थिः।[6] तृतीये तु, विद्यायामाचार्यः पूर्वरूपः शिष्यश्चोतररूपोऽनयोर्विद्या सन्धिर्व्याख्या च विद्यासन्धिग्रन्थिः।[7] चतुर्थे मातास्ति पूर्वरूपा पिता पररूपः सन्तानः सन्धिः प्रजननञ्च सन्धेर्ग्रन्थिः। आत्मनि च प्रथमः हनुः प्रथमः रूपः निम्नहनुश्च परवर्ती रूपः वाक् च सन्धिः जिह्वा च सन्धिग्रन्थिरूपेण कथिता।[8] यो जानातीमां महासंहितां तस्मिन् सन्तानगोधनपवित्रदीप्तान्नादि संयुज्यते। अखिलान्नान्तर्गतास्तस्य, तत्कृते च स्वर्गे उच्चावस्थापेक्ष्यते।

## शिक्षोपासने

यया वर्णादीनामुच्चारणादिः शिक्ष्यते सैव शिक्षेति प्रचक्षते। अथवा यच्छिक्ष्यते तदेव वर्णाद्युच्चारणादिरेव शिक्षा। उपनिषत्पाठेष्वर्थ एव प्रधानविषयः, तत्र यदि शब्दसमूहानामुच्चारणादिकं सुष्ठुतया न क्रियते तर्ह्यर्थबोधः व्याहत एव भवतीत्यस्मादेव शिक्षोद्देश्यमपरिहार्यम्। प्रत्येकं मनुष्यस्य कृते शिक्षाध्यायगतविषयानामधिगमनमावश्यकम्। शिक्षैव मनुष्यजीवनान्धकारस्य मोचन एकमात्रसहायिका। एषा शिक्षा मनुष्यमनोगताज्ञतान्धकारान् विनश्य समाजमग्रे सारयति, तस्य कल्याणं साधयति च। एषोपनिषन्न केवलं शिक्षाग्रहणविषये वचनमातनोत्यपितु, तदात्मस्थकरणोपायापि निर्दिशति। हृदयङ्गमे निरन्तरालोचना साधनावश्यिकेति कथयति- **'अथातः संहिताया उपनिषदं व्याख्यास्यामः'**।[9] परमेश्वरस्य समीपे सम्प्रार्थ्यत आचार्यशिष्ययोः समरक्षणाय, विद्यायाः प्रसादाय, शान्त्यै च। तौ गुरुशिष्यौ परस्परविद्वेषभावं सर्वथा परित्यज्याध्यात्मिकभौतिकदैविकाख्यत्रिविधदुःखान् नश्यास्ताम्। एतन्मन्त्रेण प्रतीयते यदाचार्यः शिष्यश्चैकीभूय विद्याप्राप्त्यर्थमाग्रहं प्रकाशयतः। कारणमत्र

3. शीक्षावल्ली, तैत्तिरीय उपनिषद् पर आधारित, पृ. 6
4. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 3/1
5. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 3/1
6. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 3/2
7. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 3/3
8. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 3/4
9. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 3/1

ह्याचार्योऽपि विद्यादानेन स्वशिष्याय स्वयमपि समृद्धो भवति। तस्मादाचार्यशिष्ययोरेकीभवने विश्वमपि महत्कार्यं सम्पन्नं भविष्यति।

श्रुत्यानयाचार्यो ब्रह्मविद्यायाः वेदाध्ययनस्य च सर्वत्र प्रचाराय ब्रह्मचारिणः शिष्यान् आह्वयति। वैदिकाश्चार्षयः सर्वेऽप्यासन्नेकैकशाः आदर्शयुक्ताः शिक्षकाः। ते शिष्यान् उपदिदिशुः- **'प्रतिवेशोऽसि प्र मा पाहि प्र मा पद्यस्व'**[10] इति अर्थात् उभेऽपि परस्परभावेन परस्परयोर्मध्ये प्रविविक्षतः। परस्परान्तगतता नाम चैकात्मताप्राप्तिः। उपास्यदेवतया सहैकात्मकत्वप्रापणमेवोपासकस्य सर्वोच्चसिद्धिः। न केवलं गुरुशिक्षसम्मिलितत्वकार्योपदेशकत्वचोदनमपि तु विश्वजनसम्मानसतयैकत्वभावेन कर्मसम्पादनस्य मार्गमपि प्रदर्श्यत अनयोपनिषदा। तैत्तिरीयोपनिषदनुशीलेन स्पष्टं भवति यच्छिक्षाधुनिकसमाजे कियदपरिहार्यत्वेन गौरवमुद्धरति। बहूपदेशप्रपूरितोपनिषदोऽस्याः सर्वानामप्युपदेशानामस्ति गभीरतात्पर्यं माहात्म्यं च। यादृशेनायं वर्तमानसमाजः अधोगच्छति , ततः मुक्त्युपायोपदेशोऽस्याः उपनिषदः गुरुत्वमनस्वीकार्यम्।

## शिष्यानुशासनम्

समीपादाचार्यस्य दीक्षाग्रहणादनन्तरं नवजन्मरूपं जीवनाध्यायं प्रारभते शिष्यः। अस्मिन्नध्याये चाचार्यसकाशादुपदेशरूपं मूलमन्त्रमधिगच्छति तच्छिष्यः, यच्चोपदेशरूपं तदादेशात्मकम्। स एवोपदेशात्मकादेश एवानुशासनम्। तदनुशासनं मानवजीवनयज्ञभूमौ मूलचालिकाशक्तिस्वरूपमेव। बाह्यिको हव्यो यज्ञो वा प्रतीकमात्रिकोऽस्ति। जीवनयज्ञे दीक्षाग्रहणायैवावश्यकतास्ति शिक्षायाः। अनयैव जीवनयज्ञस्य परिचलनं सम्भवति। जीवनयज्ञनिर्वहणविधिनियमा एवाचार्यैरुच्यन्ते। वैदिकाचार्योक्तानुसारेणैव **'एव चैव उपास्यम्'**[11] इत्यादिधर्ममार्गस्यानुसरणं करणीयम्। वस्तुतस्तु दण्डो वा करुणा वोभाववेश्वरस्य कर्म इत्यतोऽस्तीश्वरनिष्ठाभक्तीश्वरदृष्टिभिर्मनसो विलीनं करणीयम्। एषैव यथार्थशिक्षा संविद्धारणा च।

## नैतिकशिक्षा

अनन्तरं ब्रह्मचर्यजीवने यथार्थवेदाध्यायनाद्गार्हस्थाश्रमे कथं सम्यग्रूपेण निर्वहणं कार्यं मनुष्यस्येत्येतन्नैतिकविषये शास्ति गुरुदेवः – **'सत्यं वदे'**ति[12] अर्थात्, आत्मसत्यता पालनीया। गुह्यञ्चैका प्रक्रिया। **'धर्मञ्चर'**[13] इति। अर्थात्, यद्वा कर्म भवतु, तद्धर्मसंगतत्वे सति करणीयमन्यथा वर्जनीयम्। परमसत्यस्वरूपस्य परब्रह्मणः प्राप्त्यर्थमेषैवास्ति व्यवहारिक्यस्थायी व्यवस्था च। सत्याचरणे

10. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 4/3
11. शीक्षावल्ली, तैत्तिरीय उपनिषद् पर आधारित, पृ. 39
12. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 11/1
13. तदेव

सति सम्भवत्यात्मदर्शनम्। सर्वं च सम्भवत्यात्मदर्शनेन। एतच्चात्मदर्शनमस्ति परमधर्मस्वरूपम्। तथापि धर्मान्तर्निहिते सत्यवचने शङ्काभवति। को नाम धर्मः? का वास्य पालने पद्धतिरस्ति? देवालयस्थदेवाराधनैव धर्म उत एकादशीपालनम्? इत्येवंप्रश्ने इत्येवं वक्तुं शक्यते यदेतत्स्थूलनियमादयः पुण्यप्राप्तिहेतवो भवितुमर्हन्ति किन्तु पालनकारी धार्मिक एव भवतीत्यत्र नास्ति निश्चयता। यो धरति जीवनं पालयति च स एव धर्मः। तथा च **'धर्मान्न प्रमदितव्यम्'**[14] इत्यस्ति। अर्थात्, धर्मान्न विमुखो भवनीयः। धर्मशब्दस्यानुष्ठेयकर्मविशेषेऽस्ति तात्पर्यम्, अतः एव तदननुष्ठानमेव प्रमादः। तेन सततं धर्मानुष्ठानं करणीयम्। तथा पुष्पस्पर्शानन्तरं वायुः सुगन्धिमातनोति दिशि दिशि, तथैव धर्मोऽपि सत्यस्वरूपः मानवकल्याणकरः सन् सर्वत्र विराजते। मनुष्यः कदापि न धर्मं विस्मरेत्। धर्मसहायकेनैव मनुष्यस्य कर्ममार्गपरिचयो भवति। दुर्जनकृतदुष्टकर्मसमूहात्स्वस्य स्वपरिवारस्य स्वसमाजस्य च संरक्षणं सज्जनकृतसुकृत्या च पावनत्वं महत्त्वपूर्णमस्ति। अस्मिन्प्रसङ्गे स्वामिपादस्य विवेकानन्दस्य वाणीयं प्रामाणिकी – 'For the world can be good and pure, only if our lives are good and pure. It is an effect, and we are the means. Therefore, let us purify ourselves. Let us make ourselves perfect.'[15]

## धर्माधारे जीवनस्य निर्माणम्

अस्मदार्योक्तोक्तिरियम्, निर्माणीयं धर्माधारेण जीवनमिति। भगवती श्रुतिश्चाचार्यमुखनिसृता सति कृतियशस्वि तेजस्वि च जीवनमुपस्थापयति। कलियुगप्रारम्भश्च सममेव समन्वितं कृष्णकृष्णदैपायनवेदव्यासाभ्याम्। नवावतारेण भगवता नवधर्मस्याधारं व्याख्यां च प्रस्तौति स्म। सत्यमिदमस्ति धर्मस्य वीजम्। तत्सत्यवचनाच्चोत्पन्ना भवति धारणा। धर्मः प्रकटीभवति च कर्मणा। कर्म च सिद्धति परोपकारेण। तस्माद्धार्मिकजीवने कौशलकर्म विभूतिकर्म भवेत्। धर्मपालनेन सह जीवनयापनमेव कुशलकर्म गार्हस्थस्य। धर्माय कर्म कुशलकर्म चात्मरक्षणाय। कामार्थयोर्विकाशे लोभक्रोधौ शत्रुरूपेण प्रतीयेते। तथा च कामपूर्तिसम्भवे लोभस्य क्रोधस्य च पूर्तिसम्भावाभावे कामस्य प्रादुर्भावः। कामक्रोधलोभत्रयमेतन्नरकस्य द्वारम्। अहंकारेणोल्लङ्घनं भवति धर्मस्य[16]। श्रेष्ठपुरुषसंसेवने सति कामक्रोधलोभैर्मुक्तिर्भवति। तथापि लोभोऽनन्तरूपेण प्रतीयते। मनुष्यो लोभप्रधानः, देवश्च कामप्रधानः, दानवश्च क्रोधप्रधानः।[17] एतस्मादेव मनुष्यस्य मुख्यधर्मोऽस्ति दानम्। यच्च श्रद्धासमन्वितं भवेत्। धर्मवृक्षेण दयया दानेन च शश्वद्देदीप्यते। श्रद्धातश्च धर्मः कर्म च सम्पूर्णं भवति। अतः एव यानि कर्माणि करणीयानि तानि शास्त्रोक्तानि भवितव्यानि। विपदापद्यद्वापतेत्तथापि कर्तव्यकरणे सत्यस्वभावेन तपोमूलेन च द्रष्टव्यं

14. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 11/1
15. www.ramkrishna.org
16. तैत्तिरीयोपनिषद्, शीक्षावल्ली, चतुर्थ अनुवाक, पृ. 35
17. शीक्षावल्ली, तैत्तिरीय उपनिषद् पर आधारित, पृ. 65

सर्वम्। ये चाचार्या अध्ययनमध्यापनं च कुर्वन्ति वेदस्य, न तेषां सीमास्ति अध्ययनाध्यापनपर्यन्तमपि तु तदतिरिच्यापि कर्तव्यं शास्त्रविहितमार्गानुसरणम्। न कर्तव्यं शास्त्रविधिवर्जितकर्मणि प्रवर्तनम्। न केवलमिदमुपदेशकर्तुराचार्यस्यावगन्तव्यस्य विषयोऽपि तूपदेशश्रोतॄणामवगन्तव्यस्य विषयः। धर्म एवास्माकं सर्वेषां जीवनस्याधारः। जीवनं धर्ममयं भवति विधिनियमचर्ययैव। एतदर्थमेवावोचन्मनुः – **'आत्मदर्शनमेव परमो धर्मः'**[18]। सम्बन्धसूत्रस्य तिरस्कारनिषेध उच्यते- **'प्रजातन्तुं मा व्यवच्छेत्सीः'**[19] इति अर्थात् सम्बन्धो भवति तन्तुग्रथितवस्त्रवत्। तन्त्वपसरणे वस्त्रसंकटवदेवास्ति प्रजासंकटः। इत्थञ्च प्रजां निर्माति शिक्षासमन्वितत्वेन संस्कृतसंयुक्तत्वेन। शाश्वतोऽयं सम्बन्धो मानवजीवनं समाजं चाङ्गाङ्गिभावेन संयोजयति।

## सामाजिकशिक्षा

तैत्तिरीयोपनिषद्ययमपरो गुरुत्वपूर्णो विषयोऽस्ति- गुरुशिष्यसम्पर्कस्य सामाजिकी शिक्षा। न केवलमाचार्यः प्रेरयति स्वशिष्यं केवलस्वकीयसाधनमार्गे, तेन साकं सामाजिकाचरणे कर्तव्येऽपि दीक्षां प्रददाति। मातृपितराचार्यातिथिपूजने प्रमादो न करणीय इत्यपि शिक्षयति। एते पूजनीया नाम सर्वेऽपि देववदेवोपास्याः। पितरावस्माकं जन्मदातरौ पालकपोषकौ, आचार्यश्चास्माकं प्रशिक्षकोऽतिथिश्च गृहागमनेनान्वयनामकं करोति गृहम्। जीवनसकलकलायामावश्यकमेतेषाम्। न केवलं माता पिता आचार्यश्च प्रत्यक्षदेवता, एतेषां विशेषपूजागौरवप्रचाराय पृथक्प्रणाममन्त्रा अप्युल्लिखिताः।

प्रगाढरुचिरस्त्यधुना धनसम्पत्तौ मनुष्यसमाजे मनुष्यस्य। श्रद्धाभावस्यार्थसंकटश्चागतोऽधुना। तन्निमित्तमेव चतुर्दिशि दृश्यते- पितृभ्यां सह सन्तानस्य दुर्व्यवहारः, गुरुषु पूजनीयेषु सम्मानाभावः शिष्यस्य, अतिथिश्चावमानितः। पित्रोरत्यन्तप्रयोजने निर्गमयति वृद्धाश्रमं सन्तानः। किमेतदेवास्माकमुचितं कार्यम्? धनं वा सम्पद्वा न सर्वस्वस्वरूपास्ति जीवने। यदाचर्यतेऽस्माभिरतिथिभिर्गुरुभिः पित्रा मात्रा सहाद्यः श्वस्तदेवास्माकं स्कन्धे आपतिष्यति। समयः नापेक्षते कस्यचित्कृते। अत एवास्माकं सम्यक् विविच्य कर्म करणीयम्। स्वसम्मानाकाङ्क्षास्ति चेदादावन्ये सम्माननं करणीयम्। सदाचाररक्षणाय गुरुजनेषु श्रद्धाचला संस्थापनीया, तद्गतादर्शोऽनुसरणीयश्च। तस्मात्प्रर्तमानावाञ्छिताचारणनिवारणायोपदेशस्यास्य प्रचार आवश्यकः– मातृदेवो भव पितृदेवो भव आचार्यदेवो भव अतिथिदेवो भव इति।[20]

श्रद्धया दानं करणीयमश्रद्धया न। तत्रापि श्रद्धापरिपूर्णदानेऽपि प्रमादो न कार्यः इत्येतच्छिक्षैवास्माकं यथार्थज्ञानमार्गे प्रेरयति। यज्ज्ञानमेतदस्यामुपनिषदि निहितमस्ति।

18. मनु- 10/108
19. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 11/1
20. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 11/2

प्रसङ्गेऽस्मिन्स्वामिविवेकानन्दोऽवोचत्- Do not stand on a high pedestal and take five cents in your hands and say, 'Here my poor man'; but be grateful that the poor man is there, so that by making a gift to help yourself. It is not the receiver that is blessed, but it is the giver. Be thankful that you are allowed to exercise your power of benevolence and mercy in the world, and thus become and perfect.[21]

अर्थगतसहायता वा कायिकसहायता वा भवतु सर्वत्रान्तरिकभावेन श्रद्धासमन्वितेन करणीयास्माभिः। दानञ्चास्माकं धनसम्पदासक्तिनिर्मोचनसहायकमस्ति। न कदापि दानं साहंकारेण कर्तव्यम्, नापि धूर्ततया। असहायस्य दानेन साहाय्येनास्माकं मनःपूतिर्भवति, तद्व्यक्तेरुपकारोऽपि भवति। फलस्वरूपेण कार्यमिदं नवप्रजन्म प्रति नवदिशामुन्मोचयति, आशां च सञ्चारयति। सर्वेषामपि सम्पर्कानां मर्यादायाः रक्षणं कर्तव्यस्य च पालनं शिष्याणां नैतिकदायित्वम्।

## आध्यात्मिकशिक्षा

तैत्तिरीयोपनिषदनुसारेणाचार्यस्य करणीयेषु महत्वपूर्णं दायित्वमस्त्याध्यात्मिकजीवनस्य मार्गप्रदर्शनम्। आध्यात्मिकतानुसन्धानहेत्वर्थे वरुणस्याचार्यस्य समीपे भृगावागते सति ब्रह्मज्ञानलाभोपायः उपदिदेश। तत्रेदमुक्तं यन्न केवलं बाह्यज्ञानविषयेषु पार्थिवज्ञानेष्वेवान्तर्भुक्तिः स्यादपि त्वन्तर्मुखिज्ञानजगत्प्रत्यपि चलनं भवेत्। एतदेवान्तर्मुखिज्ञानमादावन्तर्बोधे नयति, तदनन्तरं ब्रह्मज्ञाने। अस्मच्छरीरमिदं अन्नमयं प्राणमयं मनोमयं विज्ञानमयमानन्दमयमिति कोशपञ्चकेन निर्मितम्। अस्याञ्चोपनिषद्यन्नमेव ब्रह्मज्ञानलाभे आदिमं द्वारम्। अन्नमेव ब्रह्मेत्यतोऽनिन्दनीयमन्नं, न तुच्छीकरणयोग्यमन्नम्। यतो ह्यन्नमेवास्माकं देहरक्षावीजम्, पुष्टिहेतुकञ्च। प्राणोऽप्यन्नेनैव पुष्यते शरीरे। शरीराभावे न सिद्ध्यति कोऽप्येकः पुरुषार्थः। अस्माकं जन्मभूमौ एतादृशाः केचन जनाः सन्ति ये जीवनधारणायान्नं न प्राप्नुवन्ति पर्याप्तत्वेन, किन्तु केचन विना विचारितेनान्नमवमिमीते। यत्र गण्डुषपरिमितेनान्नेन कस्यचित्क्षुन्निवृत्तिः सम्भवति। अतोऽन्नं नानादरणीयम्। अस्मद्गृहागतेऽवमाननं न कर्तव्यम्, नानुपेक्षणीयम्। सामर्थ्यानुसारेणान्नपानासनादिनाभ्यर्थना कार्या। अनयैव गृहस्थो भवति अन्नवान् कीर्तिमान् प्रजापशुब्रह्मतेजःसमृद्धः। इत्थञ्चान्नमाहात्म्यं वर्णयित्वा भिन्नाश्रये भिन्नरूपेणोपासनां विदधाति- 'अन्नं न निन्द्यात्। तद्व्रतम्। प्राणो वा अन्नं शरीरमन्नादम्। प्राणे शरीरं प्रतिष्ठितम्। शरीरे प्राणः प्रतिष्ठितः। तदेतदन्नमन्ने प्रतिष्ठितम्।'[22]

तदनन्तरं पितुर्वरुणस्योपदेशमनुसृत्य मन एव ब्रह्मेति निचिचाय। यतो हि मनस एव भूतानि

21. www.greenmesg.org
22. तैत्तिरीयोपनिषद्, भृगुवल्ली- 7/1

सर्वाण्युत्पद्यन्ते जातानि च मनसैव जीवन्ति। अन्ते च मनस प्रलयं यान्ति तानि, पुनश्च मनस एव सर्वाणि प्रविशन्ति। पितुरुपदेशेन पुनः स एव भृगुः विज्ञानं ब्रह्मेत्यचिनोत्। विज्ञानादेव उत्पन्ना भवन्ति, भवन्ति च जीवन्ति। अन्ते च तस्मादेव निर्गत्य विज्ञान एव सर्वाणि प्रविशन्ति। इत्थञ्च लब्ध्वा ज्ञानं पुनर्निवेदयामास गत्वा स्वकीयं निर्णयं स्वपितरं वरुणम्। इतःपरं पितुरुपदेशानुसारेण विविच्य सम्यक्तयानन्दमेव ब्रह्मेत्यचैषीद्भृगुः। यतो ह्यानन्दादेवोत्पद्यन्त इमानि सर्वाणि भूतानि। आनन्देनैव जीवन्त्यन्त आनन्दे एव प्रलीयन्ते, इत्थम्भूतप्रकारेण ब्रह्मज्ञानसाक्षात्कारेण स परब्रह्मणः पूर्णविद्यां लेभे। एषा एव भृगोर्ज्ञाप्तिः, एषा च वरुणोपदिष्टा विद्या।

यः कोऽपि साधको भृगुवत्तपसा परिशुद्धचित्तः सन् एवंप्रकारेण विचिन्त्य परमानन्दमयं परब्रह्म परमात्मानमुपलब्धुं सक्षमो भवति सोऽपि तस्मिन्नेव विशुद्धे परमानन्दस्वरूपे परमात्मनि प्रतितिष्ठति। एतद्विहायाप्यस्मिल्लोकेऽपि सोऽन्नवान् भवति, अन्नजरीकरणेऽपि समर्थो भवति, सन्ततिपशुब्रह्मतेजोमहद्यशोभिः समृद्धो भूत्वा महतां मध्ये महनीयो भवति। एतस्मादुपनिषतोऽत्यन्तं सजीवसुन्दरं शिक्षाजीवनदर्शनं निरूपितम्। अत्रान्नादारभ्यानन्दपर्यन्तं ब्रह्मचैतन्यस्य क्रमविकाशः, आनन्दमीमांसा च सुस्पष्टतया विवृता। अतोऽवगम्यते यदानन्दादेव जगतः सृष्टिस्थितिलयाः भवन्ति। जीवनं हि शश्वत्परिवर्तनशीलमस्ति। योऽद्य युवा, स एव श्वो वृद्धो भविष्यति। यश्चाद्य वृद्धः सः कालधर्मेण पञ्चत्वं गमिष्यति। तस्मादस्माकं जीवनं सदैवानन्देन यापयितव्यम्।उपनिषदेषानन्दप्राप्तिमार्गं दर्शयित्वात्मानं समृद्धं करोति, मानवजीवनं च पूर्णतायां नयति। आचार्यः शिष्यं शिक्षयति—जगतोऽस्य नश्वरतां ज्ञात्वा परमात्मानुसन्धानीयः। इत्थञ्च शिष्यः गुरूपदेशेन जीवनस्योद्देश्यमवगच्छति यत्, एतत्तत्त्वं न केवलं लौकिकसफलतायाम् अन्तर्भवत्यपि तु मोक्षस्वरूपे परमपुरुषार्थे प्रतिष्ठापयति। आध्यात्मिकी शिक्षा नाम लौकिकज्ञानसीमामतीत्य स्वशिष्यं परमसत्यस्यात्मबोधस्य चानुभूतौ नीयमानप्रक्रिया। सम्प्रत्यगणितैः राजनैतिकैः अर्थनैतिकैश्च मतैः घोरं जालं प्रसृतम्, येन पूर्वे ये महान्तः दार्शनिकमतप्रवर्तकाः ये चास्माकं व्यक्तिजीवने सामाजिकजीवने च चिन्तनशीलतायाः आध्यात्मिकतायाः उत्कर्षणं साधयामासुः तेषां चर्चाः शनैः शममगमन्। तस्मादेव हेतोः समाजे रागद्वेषहिंसाप्रतिहिंसाः प्रवृत्ताः दृश्यन्ते प्रबलाकारेण।

**उपसंहारः**

प्रागैतिहासिककाले वैदिकयुगे शिक्षासीत् गुरुकुलपरम्परानुसारिणी। तदाचार्याः बहुयत्नेन क्षार्जनगुरुकुलवासनियमशृङ्खलाशास्त्राध्ययनशीलशालिनताचारनिष्ठादिविषयकविविधविद्यासमन्वित विद्याभिः पुस्तकगतविद्यया नीतिसामाजिकधर्मशिक्षाभिश्च सत्यवचनधर्माचरणसद्व्यवहार-प्रवृत्तिभिः प्राज्ञान् कुर्वन्ति स्म स्वशिष्यान्। सहैव लौकिकविद्ययाचार्यः शिष्यं शिक्षयति ब्रह्मविद्यां परमयत्नेन। यच्च मनुष्यशरीरान्तर्निहितान्तरिन्दियं मनोऽन्तरात्मानं चाध्यात्मिकमार्गेऽग्रगमनं

सरलत्वेन साधयति। यद्यपीदानीन्तनी शिक्षाव्यवस्थोन्नता,विहाय श्रुतिपरम्परामाधुनिकज्ञान-विज्ञानस्य कल्याणेन परीक्षानिरीक्षयोपयोगिनां विविधवस्तूनामुत्पादनमभवत्तथापि मनुष्यस्य या विवेकनीतिनैतिकसद्व्यवहारश्रद्धाविनम्रसमन्विता शिक्षा सा विलीयमानेव। सम्प्रति नवशिक्षापद्धतौ यन्निर्दिष्टं पाठ्यक्रममस्ति, तदवश्यं ग्राह्यमेव। कुतः इति चेदिदं वक्तव्यं समाजं राष्ट्रं च अग्रे नेतुं, विदेशैः सह सममानंसंस्थापयितुंचात्यावश्यिकेयंनूतनाशिक्षापद्धतिः।किन्त्वत्रनीतिशिक्षापिसंयोजयेत्।शिक्षयोच्चपदं तु याति मनुष्यः परन्तु कुत्राधोगच्छत्यद्य मनुष्यत्वम्? सर्वोपर्यस्यैव प्रश्नस्योत्तरमन्वेषणीयमस्माभिः। आधुनिकतया सममेव समगत्या संस्कृतसंस्कृत्यादिभारतीयपरम्परागतशास्त्राध्ययनमवश्यमेव कार्यम्। तेनैव **'मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव'**[23] इत्येतादृशैरुपदेशवाक्यैरनुशासनं, नैतिकताबोधः मनुष्यत्वबोधश्च चिरन्तनं भविष्यतीति शम्।

**सन्दर्भग्रन्थाः**


1. *तैत्तिरीयोपनिषद्* (शाङ्करभाष्यसहितः), घनश्यामदासः जालानः, गीताप्रेसः, गोरखपुरः ।
2. ईश्वरानन्दरिरिः, स्वामी, *शिक्षावल्ली(तैत्तिरीयोपनिषदेन आधारितः),* संवित्-साधनायनः, सन्त-सरोवरः, आबु-पर्वतः – 307 501 (राजस्थानः)।
3. Sastri, Mahadeva, *Taittiriya Upanishad* with Sankaracharya, Suresvaracharya, Mysore, Printed at The G.T.A. Printing Works, 1903.
4. Sharvananda, Swami, *Taittiriya-Upanishad* (with Sanskrit Text, English Rendering and Comments), The Ramkrishna Math, Mylapore, Madras, 1821.
5. Justananda, Swami, *Taittiriya-Upanishad* (Sankara-Bhashya), Udvodhan Kariyalaya, Kolkata.


**अन्तर्जालसन्दर्भाः**


6. Green Message - Evergreen Messages of Spirituality, Sanskrit and Nature. दिनाङ्कः 08.11.2025, समयः 2: 30 p.m.
7. www.ramkrishna.org. दिनाङ्कः 08.11.2025, समयः 2:53 p.m.


23. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 11/2